वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# अद्वैतविशिष्टाद्वैताऽक्षरपुरुषोत्तमेतिदर्शनत्रयाऽऽलोके कठोक्ताऽव्यक्तशब्दयोजना

आचार्यः साधुज्ञानतृप्तदासः[१]

## पूर्वभूमिका

कृष्णयजुर्वेदीयकठशाखाऽन्तर्गतत्वात् कठेति संज्ञां प्राप्तेयमुपनिषदाख्यायिकामुखेन ब्रह्मविद्यामेव स्तौति। उशन् ह वै वाजश्रवसः सर्ववेदसं ददावित्यारभ्य प्राप्तब्रह्मविद्येनाऽनाद्यज्ञानान्मुक्तिरवाप्यत इति सिद्धान्तं वर्णयद् मृत्युप्रोक्तं सनातनं नाचिकेतमुपाख्यानमुक्त्वा श्रुत्वा च मेधावी परमात्मपरमदिव्यधामाप्नोतीत्यत्रैवोद्धोषितम्। पित्रनुवृत्तिपालनतत्परो नचिकेतो यमसदनमित्य यमराजप्रसन्नताफलभूतवरदानत्रयं ययाच। तत्र सप्रमाणं सयुक्तिकं च नास्तिकादिप्रतिवादिकुतर्कजालं विदारयितुं वैदिकसनातनराद्धान्तं च प्रस्थापयितुं तृतीयवरयाच्ञारूपेणाऽऽत्यन्तिकश्रेयःकरं ब्रह्मविद्यात्मकसिद्धान्तमेव सविस्तरं विश्रोतुं प्रार्थयामास सुकुमारो नचिकेताः। यमराजोऽपि नचिकेतोयाचितवरमाकर्ण्य स्थूणानिखननन्यायेन पात्रपरीक्षणपुरःसरं ब्रह्मज्ञानं कथयाञ्चकार।

एतत्क्रमानुसारं तृतीयायां वल्ल्यां रूपकविन्यासद्वारा इन्द्रियादीनामुत्तरोत्तरं महत्त्वं प्रदर्शयितुं कथितम् –

**“इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः।।**

**महतः परमव्यक्तमव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।।”[२]**

---

[१] पीएचडी शोधच्छात्रः, श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल, Address: BAPS Swaminarayan Mandir, Sarangpur, Ta. Barvala, Dist. Botad., (M) +91 706 9062 201, Email: gt0701@sampark.email

[२] कठोपनिषत् - ३/१०,११

अत्र प्रत्यगात्मस्वरूपतोऽप्यधिकस्य पुरुषपदवाच्यपरमात्ममात्रन्यूनस्य अव्यक्तशब्दस्य कस्मिन्नर्थे पर्यवसानमिति अद्वैत-विशिष्टाद्वैत-अक्षरपुरुषोत्तमदर्शनानामाधारेण समीक्षणमारभ्यते।

## विषयचयनहेतुः

ननु कठवल्लीनिरूपितरूपकविन्यासप्रकरणे अव्यक्तपदमेव गृहीत्वा तदर्थविषये विमर्शप्रयोजनमेव नास्तीति चेद् नैवं, प्रयोजनं त्वस्त्येव, प्रस्तुते प्रकरण इन्द्रियार्थमनोबुद्ध्यात्मपुरुषशब्दानां स्पष्टप्रतिपत्तिः परन्त्वव्यक्तशब्दस्य स्पष्टप्रतिपत्त्यभावदर्शनाद्, अद्वैतादिदर्शनेषु भिन्नत्वेनार्थकरणाद्, त्रयाणामपि प्रस्थानानां समीक्षणेन श्रुतिवचनरहः समासुं च भवति प्रयोजनवदिदं समीक्षणम्।

## अद्वैतदर्शने अव्यक्तशब्दार्थः

कठोपनिषच्छाङ्करभाष्ये 'बुद्धेरात्मा महान् परः' इत्यस्यार्थो विहितो यद् 'बुद्धेरात्मा सर्वप्राणिबुद्धीनां प्रत्यगात्मभूतत्वादात्मा महान् सर्वमहत्त्वात्। अव्यक्ताद्यत् प्रथमं जातं हैरण्यगर्भं तत्त्वं बोधाबोधात्मकं महानात्मा बुद्धेः परमित्युच्यते।'[३]

ततश्च महतः परमव्यक्तमिति वाक्यमधिकृत्योल्लिखितं यद् 'महतोऽपि परं सूक्ष्मतरं प्रत्यगात्मभूतं सर्वमहत्तरं च अव्यक्तं सर्वस्य जगतो बीजभूतम् अव्याकृतनामरूपसत्तत्त्वं सर्वकार्यकारणशक्तिसमाहाररूपम् अव्यक्ताऽव्याकृताऽऽकाशादिनामवाच्यं परमात्मन्योतप्रोतभावेन समाश्रितं वटकणिकायामिव वटवृक्षशक्तिः।'[४]

सर्वमहनीयत्वं सर्वजगद्बीजभूतत्वमित्यादिलक्षणानि जगत्कारणभूतं शक्तिस्वरूपमज्ञानमेव लक्षयति। अर्थाद् महतः परत्वेन पुरुषान्न्यूनत्वेन च कथितमव्यक्तं, येन चैतन्यमुपहितं तदज्ञानमेवेति कठोपनिषच्छाङ्करभाष्ये सिद्ध्यति।

एष एवोपनिषद्मन्त्रसन्दर्भं गृहीत्वा ब्रह्मसूत्रभाष्य आनुमानिकाधिकरणेऽपि आनुमानिकमप्येकेषामिति चेन्नेति महर्षिकृष्णद्वैपायनव्यासवचनं स्वीकृत्य सोहापोहमव्यक्तशब्दस्य साङ्ख्यकथितप्रधानवाच्यत्वं निरस्य शरीररूपकविन्यस्तगृहीतेर्दर्शयति चेति वाक्यस्यार्थं शङ्कराचार्यश्चकार। 'शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते। प्रकरणात् परिशेषाच्च।'[५] इत्यादिवाक्यैः पाञ्चभौतिकशरीरवाच्योऽयमव्यक्तशब्द एवेति प्रतिपादितम्।

---

[३] कठोपनिषच्छाङ्करभाष्यम् - 92

[४] कठोपनिषच्छाङ्करभाष्यम् – 92,93

[५] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/१

उपरोक्तसन्दर्भाणामाधारेण कठोपनिषद्भाष्ये ह्यव्यक्तं जगत्कारणशक्तिः ब्रह्मसूत्रभाष्ये च तदेव जगत्कार्यभूतं पाञ्चभौतिकं शरीरं विवर्णितम्। तत्र शरीरार्थकरणे कारणमाह रथिरथादिरूपकक्लृप्तिरिति। कथितं च काठकैः

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु।

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।**
**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।"**[६]

इति रूपकनिरूपणं गृहीत्वाऽत्र कथितं यद् "तैश्चेन्द्रियादिभिरसंयतैः संसारमधिगच्छति संयतैस्त्वध्वनः पारं तद्विष्णोः परं पदमाप्नोतीति दर्शयित्वा, किं तदध्वनः पारं विष्णोः परमं पदमित्याकाङ्क्षायां तेभ्य एव प्रकृतेभ्य इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परमं पदं दर्शयति – इन्द्रियेभ्यः परा .... सा परा गतिः।। इति। तत्र य एवेन्द्रियादयः पूर्वस्यां रथरूपककल्पनायामश्वादिभावेन प्रकृतास्त एवेह परिगृह्यन्ते प्रकृतहानाप्रकृतप्रक्रियापरिहाराय।"[७]

तत इन्द्रियार्थमनोबुद्ध्यात्मनामुत्तरोत्तरमाधिक्यकारणं प्रदर्श्योक्तं यद् "तदेवं शरीरमेवैकं परिशिष्यते। इतराणीन्द्रियादीनि प्रकृतान्येव परमपददिदर्शयिषया समनुक्रामन् परिशिष्यमाणेनेहान्त्येनाऽव्यक्तशब्देन परिशिष्यमाणं प्रकृतं शरीरं दर्शयतीति गम्यते।"[८]

यद्यस्मिन् विषये कश्चिदाशङ्कां प्रस्तूयेत यन्न व्यक्तमित्यव्यक्तमिति समासविग्रहेणाऽव्यक्तशब्दस्य शरीरार्थकत्वं न सम्भवति शरीरस्य व्यक्तस्वरूपत्वदर्शनात् तथा हि "यावता स्थूलत्वात् स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हमस्पष्टवचनस्त्वव्यक्तशब्द इति।"[९] एतच्छङ्कानिराकरणाय "सूक्ष्मं तु तदर्हत्वात्"[१०] इति बादरायणसूत्रस्याधारेणोक्तं यद् "सूक्ष्मं त्विह कारणात्मना शरीरं विवक्ष्यते सूक्ष्मस्याऽव्यक्तशब्दार्हत्वात्। यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति तथापि तस्य त्वारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति।"[११]

---

[६] कठोपनिषत् - ३/३,४

[७] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/१

[८] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/१

[९] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/२

[१०] ब्रह्मसूत्रम् – १/४/१/२

[११] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/२

पुनश्चाऽव्यक्तशब्दं सार्थकीकर्तुं परमेश्वराधीना प्रागवस्था जगतः कारणत्वेनाऽत्राऽभ्युपगता।[१२]

एतत्सर्वं निरूपणमवलोक्यैवं निश्चीयते यदद्वैतवेदान्तानुसारम्

(१) रथरथिरूपकनिरूपितं शरीरमेव अव्यक्तशब्दार्थः।

(२) स्थूलशरीरारम्भकं भूतसूक्ष्ममव्यक्तशब्देन गृह्यते।

(३) परमेश्वराधीना जगत्कारणत्वेनाऽभ्युपगता प्रागवस्था अव्यक्तशब्देन कथिता।

एवमेकस्यैवाव्यक्तशब्दस्य शरीर-भूतसूक्ष्मादिभेदेन निरूपणं विधाय तेषामभेदोपचारकथनादद्वैतत्वं संरक्षितम्।

## विशिष्टाद्वैतदर्शने अव्यक्तशब्दार्थः

श्रीरङ्गरामानुजविरचितकठोपनिषद्भाष्ये ब्रह्मसूत्रश्रीभाष्यवचनानुसारमेव "महतः परमव्यक्तम्" इति मन्त्रांशं निरूपयितुमुक्तं यद् "आत्मैव महानिति च विशिष्यते। तस्मादपि रथरूपितं शरीरं परम्। तदायत्तत्वाज्जीवस्य सकलपुरुषार्थसाधनप्रवृत्तीनाम्।"[१३]

श्रीभाष्येऽपि आनुमानिकाधिकरणे बादरायणप्रोक्तसूत्रनिरूपणेन प्रधानकारणवादिनां कापिलानां निरसनपुरःसरं शरीररूपकविन्यस्तगृहीतेरिति सूत्रांशस्य विवरणद्वारा अद्वैतवद् आत्मानं रथिनं विद्धीत्यादिश्लोकानाधारीकृत्य प्रत्यभिज्ञयाऽव्यक्तं शरीरार्थकमित्येव प्रतिपादितम्।

पुनश्च सूक्ष्मं तु तदर्हत्वादिति सूत्रस्य निरूपणे गदितं यद् "भूतसूक्ष्ममव्याकृतं हि अवस्थाविशेषमापन्नं शरीरं भवति। तदव्याकृतमिह शरीरावस्थम् अव्यक्तशब्देनोच्यते।"[१४] अतः स्थूलशरीरकारणं भूतसूक्ष्ममव्यक्तं तच्च परमात्माधीनं परमात्मशरीरं चेत्यपि रामानुजाचार्याभिप्रेतम्।

### अक्षरपुरुषोत्तमदर्शने अव्यक्तशब्दार्थः

परब्रह्मस्वामिनारायणप्रबोधितब्रह्मस्वरूपगुणातीतगुरुपरम्परोपबृंहितसम्पोषितप्रवर्तिताऽक्षर-पुरुषोत्तमदर्शने नित्यानि पारमार्थिकत्वेन च सनातनसत्यानि पञ्च तत्त्वानि स्वीकृतानि। कथितं चात्र

---

[१२] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/३

[१३] नारायण et al., ईशकेनकठप्रश्नमुण्डमाण्डूक्यानन्दवल्लीभृगूपनिषदः, 75.

[१४] श्रीभाष्यम् – १/४/२

“जीव ईश्वरो माया ब्रह्म परब्रह्म चेति पञ्च तत्त्वानि नित्यानि सत्यानि परस्परं स्वरूपतः सदैव भिन्नानि चेति।”[१५]

दर्शनेऽस्मिन् पञ्चस्वपि तत्त्वेष्वक्षरब्रह्मतत्त्वविषये स्पष्टीकृतं यदेतदक्षरं ब्रह्म परब्रह्मणो भिन्नं परब्रह्मेव नित्यम् एकं त्रिगुणातीतं सदा दिव्यं चेतनं च तत्त्वमस्ति। तत्त्वस्यास्य स्वरूपगुणैश्वर्यादिकमेकमात्रपरब्रह्माधीनमेव परब्रह्मणश्च नित्येच्छया तज्जडचिदात्मकसकलसृष्टेः कारणं भवति।

एतद्ध्येवाऽक्षरं ब्रह्म वाजिप्रोक्ताऽव्यक्तशब्दाभिधायीति कठोपनिषत्स्वामिनारायणभाष्ये स्फुटं गदितम्। महतः परमव्यक्तमिति प्रस्तुतमन्त्रांशनिरूपणावसरेऽत्र स्पष्टीकृतं यद् “महतः बुद्ध्यादिभ्यो महद्भूतादात्मनः परं परभूतं प्रबलम् अव्यक्तम् अक्षरं ब्रह्म। मायिककरणैः प्रत्यक्षतया व्यक्तुमशक्यत्वादव्यक्तमिति।”[१६]

अत्राऽव्यक्तशब्दवाच्याऽक्षरब्रह्मणो महत्तोऽप्यात्मतः परभूतत्वकारणं प्रदर्शयितुमाह “केवलात्मनिष्ठासम्पादनेऽपि न परमात्मसुखानुभूतिर्न वा संसाराध्वनः पारभूतस्य परमात्मपदस्याऽवाप्तिरित्यतस्तदात्मनोऽपि परभूतं तत्त्वद्वयं ब्रह्मपरब्रह्माख्यं क्रमश उपस्थापयति।” तथा च “आत्मन इन्द्रियमनोबुद्ध्याद्यपेक्षया प्रबलत्वेऽपि तस्याऽनादिमायावेष्टितत्त्वादक्षरब्रह्मणश्चाऽनादित एव मायागन्धशून्यत्वान्मायावेष्टितानप्यात्मनो मायारहितान् ब्रह्मरूपाँश्च कर्तुं सामर्थ्यशालित्वात् स्यादेव तस्याऽऽत्मनः प्रबलत्वमिति।”[१७]

ततश्चाऽव्यक्तशब्दस्याऽक्षरब्रह्मार्थकत्वं सप्रमाणं सप्रपञ्चं निरूपयति। तत्राप्यादावव्यक्तशब्दस्य शास्त्रान्तरेषु विविधार्थकत्वं प्रदर्शितं यथा “यद्यप्यव्यक्तशब्दो विविधार्थेषूपयुक्तो दृश्यते यथा ‘मया ततमिदं सर्वं जगदव्यक्तमूर्तिना’ (गी.९/४) इत्यादौ परमात्मनि। ‘अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते’ (गी.२/२५) इत्यादावात्मनि। ‘अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव तत्र का परिदेवना।।’ (गी.२/२८) .... इत्यादौ जगदुपादानभूतायां प्रकृतौ। ‘व्यक्ताव्यक्तं भरते विश्वमीशः’ (श्वे.१/८) इत्यादौ च प्रकृतिकार्यभूते विश्व इति ”

---

१५ स्वामिनारायणसिद्धान्तसुधा – मङ्गलधारा/सिद्धान्तसमाम्नायः

१६ ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम् - ३/३,४

१७ ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम् - ३/३,४

तदनन्तरमत्र त्वव्यक्तशब्दार्थः अक्षरब्रह्म विहाय नान्यत्किमपि वरयतीति सम्यक् प्रतिपादितं यथा "अत्रोपयुक्तोऽव्यक्तशब्दस्त्वक्षरं ब्रह्मैवाभिधत्ते, नैव परं ब्रह्म नैव जीवात्मानं नैव प्रकृतिं तत्कार्यविश्वं वा। कुत इति चेद् 'बुद्धेरात्मा महान् परो महतः परमव्यक्तम्' इति महच्छब्देनाऽऽत्मनो ग्रहणादव्यक्तस्य च तत्परश्रवणान्न तावज्जीवः। 'अव्यक्तात् पुरुषः परः' इति पुरुषशब्दवाच्यपरमात्मनस्तत्परत्वोक्तेर्नापि परं ब्रह्म। उत्तरश्रुत्यनुरोधाच्च न प्रकृतिः। तथा ह्यत्रैवोत्तरत्र 'अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते।।' (कठ.३/१५) इति श्रुतिराम्नाता। अत्र महतः परमित्यस्य 'महतः परमव्यक्तमव्यक्तात् पुरुषः परः' इति पूर्ववाक्यसङ्गत्या महच्छब्दवाच्यादात्मनः परभूतमव्यक्तं पुरुषश्चेति तत्त्वद्वयमित्यर्थः सिद्ध्यति। तथा चाऽनाद्यनन्तं नित्यमत एव ध्रुवं तत्तत्त्वद्वयं निचाय्य ध्यात्वा ज्ञात्वा वा मृत्युमुखात् प्रमुच्यत इति सम्पूर्णोऽर्थः सिद्धः। अथाऽत्रोक्ताऽव्यक्तशब्दस्य प्रकृतिपरत्वे तस्य महतः परत्वात् तद्ध्यानेन तज्ज्ञानेनैवाऽसम्भाव्यमानो मोक्षः प्रसज्येत। न च तथा कोऽपि वेदो वेदान्तो वा ब्रवीति। ब्रवीति च भूयो ब्रह्मणः परब्रह्मणश्च वेद्यत्वं तद्वेदनेन मोक्षश्च। यथा 'ब्रह्मविदाप्नोति परम्' (तै.२/१/१) ... इत्यादावक्षरब्रह्मणः। 'तरति शोकमात्मवित्' (छा.७/१/३) इत्यादौ च परब्रह्मणः। 'येनाऽक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' (मु.१/२/१३) इत्यादावुभयोः।"[१८]

एवमव्यक्तशब्दस्य जीव-परब्रह्म-प्रकृत्यर्थपरत्वं सप्रमाणं निषिध्य भूयश्च बादरायणसूत्रनिरूपणावसरेऽपि तस्य शरीरादयोऽर्थाऽपि निराकृताः। तत्राऽऽनुमानिकाधिकरण आदिम एव सूत्रे शरीररूपकविन्यस्तगृहीतेः इति सूत्रांशस्य विवर्णने 'इन्द्रियेभ्यो परा ह्यर्था' इत्यारभ्य 'सा काष्ठा सा परा गतिः' इत्यन्तो वाक्यगण एव सन्दर्भरूपेण स्वीकृतः। तथा चास्मिन्नेव प्रकरणे 'ऋतं पिबन्तौ सुकृतस्य लोके'[१९] इत्यारभ्योल्लिखितानि रूपकाणि संस्मृतानि, यथा "तत्रादौ 'यः सेतुरीजानानामक्षरं ब्रह्म यत् परम्। अभयं तितीर्षतां पारं नाचिकेतं शकेमहि।।' (कठ.३/२) इत्यत्र पारमिति परमगन्तव्यदिव्यदेशरूपमक्षरं ब्रह्म, सेतुरिति तत्प्राप्तिमाध्यमभूतगुरुरूपं च तत्, तितीर्षतामिति च तदुपायानुष्ठाता प्रत्यगात्मा चेति रूपकभावत उपदिष्टम्।"[२०] ततश्च रथिरथसारथिप्रग्रहहयादिरूपकद्वारा आत्म-शरीरबुद्धिमनइन्द्रियादीनां यत् स्थानं कार्यं च प्रदर्शितं तदत्रोदलिख्यत।

एवं प्रकरणेऽस्मिन् विवर्णितानि सकलान्यपि रूपकाणि कथयित्वा तद्रूपकविन्यासग्रहणपुरःसरमव्यक्तशब्दस्य शरीरार्थकत्वं सोहापोहं निराकर्तुमाह "ननु पूर्वं शरीरमिति प्रधानमेवोक्तमुत्तरत्राऽव्यक्तमिति स्पष्टं परामृश्यत इति चेन्न, भोगायतनस्यैव तत्र प्रकृतत्वात् तदेव

---

[१८] ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम् - ३/३,४

[१९] कठोपनिषत् - ३/१

[२०] ब्रह्मसूत्रस्वामिनारायणभाष्यम् - १/४/१

प्रधानमिति कः सांख्यानुगो मनुते। ननु तर्हि भवतु भोगायतनमेव शरीरशब्देन पूर्वमुक्तमिहाऽव्यक्तशब्दवाच्यमिति चेत् कोऽयमन्यस्तर्ककुशलः। नैवं कापिला वदेयुः। शरीरस्थानेऽव्यक्तपदप्रयोगे हेतुर्वा प्रयोजनं वा वक्तव्यम्। तत्तु नास्ति। नन्वव्यक्तविकारविशेषत्वादेव तदव्यक्तशब्देनोच्यत इति चेद् इन्द्रियार्थमनोबुद्धयः कुतो नोक्ताः। एवं स्याद्, इन्द्रियादीनां पूर्वं रूपकविन्यस्तानामेवेह प्रत्यभिज्ञानात् शरीरशब्दाऽश्रवणाद् अव्यक्तशब्दश्रवणाच्च रूपकयोजनाबलेन परिशेषतया शरीरमेवाऽव्यक्तशब्दतयोच्यत इति निश्चीयत इति। तदप्यसद्, भोगायतन-लक्षणशरीरस्याऽव्यक्तशब्दाभिधेयत्वाऽप्रसिद्धेः। इत एव प्रसिद्धिरस्त्विवति चेद् गत्यन्तराऽभावे ह्ययं पन्थाः समीचीनः। तर्हि प्रत्यभिज्ञानिबन्धनाया रूपकयोजनायाः का गतिरिति चेत्, तत्त्वत्रयमात्रवादिनामयं व्याधिः। भगवती श्रुतिस्तु तत्त्वपञ्चकोपदेष्ट्रीह तत्त्वत्रयातिरिक्तमेवाऽक्षरं ब्रह्माख्यं दिव्यतत्त्वमव्यक्तशब्देन प्रत्यभिजानाति। पूर्वं तद्रूपणं क्वोपलब्धमिति चेद् 'यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्।' (कठ.३/२) इत्युक्तमेव प्राक्। न वेहाऽक्षरब्रह्मणः शरीरस्येवाऽव्यक्तशब्दाऽभिधेयत्वाऽप्रसिद्धिदोषाऽवकाशः, 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्' (गी.८/२१) इति तत्प्रसिद्धेः।"[२१]

एवं प्रमाणपुरःसरमव्यक्तशब्दस्यार्थं विधाय भूयश्च गीताप्रस्तावोऽपि प्रमाणत्वेन संगृह्योक्तं यद् "तथा च 'किं तद् ब्रह्म' (गी.८/१) इति पार्थजिज्ञासायाम् 'अक्षरं ब्रह्म परमम्' (गी.८/३) इति समाधाय तदेवाऽक्षरं ब्रह्म विशेषमुपदेष्टुं प्रतिज्ञातं 'यदक्षरं वेदविदो वदन्ति... तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये' (गी.८/११) इति। तदेवाक्षरं निरूपयता पुनस्तदव्यक्तशब्देनोपस्थापितम् 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥' (गी.८/२१) इति। अपरं च तत्रैव 'अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे' (गी.८/१८) इत्यादौ प्रकृतावव्यक्तशब्दं प्रयुज्याऽपि तदुत्तरमेव 'परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात्सनातनः। यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥' (गी.८/२०) इत्यनेन प्रकृतिवाचकाद् अव्यक्त-शब्दादक्षरब्रह्मवाचकमव्यक्तशब्दं पृथक्तया प्रयुज्य तमधिकृत्यैवाव्यक्तोऽक्षर इत्युक्त इत्युक्तम्। ततश्चैतच्छलोकाव्यवहितोत्तरमेव 'पुरुषः स परः पार्थ भक्त्या

---

[२१] ब्रह्मसूत्रस्वामिनारायणभाष्यम् - १/४/१

लभ्यस्त्वनन्यया' (गी.८/२२) इत्युक्तिः (अव्यक्तात् पुरुषः परः इति वचनसंगत्या) कठोक्तमव्यक्तमक्षरं ब्रह्मैव सुव्यक्तं प्रमाणयति।"[२२]

## निर्णयः

अद्वैतदर्शने तु क्वचिद् रथरथिरूपकनिरूपितं पाञ्चभौतिकं शरीरमेव अव्यक्तशब्दार्थत्वेनोक्तं क्वचित् स्थूलशरीरारम्भकं भूतसूक्ष्मं गृहीतं क्वचिच्च परमेश्वराधीना जगत्कारणत्वेनाऽभ्युपगता प्रागवस्था स्वीकृता। तेषामभेदोपचारकथनेऽपि तात्पर्यनिर्णये उपक्रमोपसंहारादिलिङ्गैः परीक्षणद्वारा निर्णीयेत यद् भिन्नत्वेनार्थकरणाद् विदधाति तदर्थशैथिल्यम्। अभेदोपचारोऽपि केवलं पारमार्थिकदृष्ट्यैव, व्यवहारदृष्ट्या तु भेदेनैवोपचर्यते तेनैव च परापरत्वं सिद्ध्येत्।

विशिष्टाद्वैतदर्शनेऽपि प्रथमं शरीरमेवाऽव्यक्तशब्दार्थकत्वेन गृहीत्वा पुनः 'भूतसूक्ष्ममव्याकृतं हि अवस्थाविशेषमापन्नं शरीरं भवति' इति वचनेन भूतसूक्ष्मं स्वीकृतम्। अतः अत्राप्युपरोक्तानुसारमेव ज्ञेयम्।

अन्यच्च प्रायः शरीरादिन्द्रियाणि ततश्चाऽन्तःकरणानि ततश्च प्रत्यङ्गात्मा महानिति लोकशास्त्रनीतिः। यद्येतेषु किञ्चिद् व्युत्क्रमेणोच्येत चेत् तर्हि हेतुर्वक्तव्यः। प्रत्यगात्मतः शरीरस्य महत्त्वं कथयितुं ब्रह्मसूत्रशाङ्करभाष्ये श्रीभाष्ये च हेतुस्तूक्त एव, यथा "यदा तु जीवो महांस्तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परमव्यक्तमित्युक्तम्। अविद्या ह्यव्यक्तम्। अविद्यावत्त्वेनैव जीवस्य सर्वः संव्यवहारः संततो वर्तते। महतः परत्वमभेदोपचारात्तद्विकारे शरीरे परिकल्प्यते .... इन्द्रियादीनां स्वशब्दैरेव गृहीतत्वात् परिशिष्टत्वाच्च शरीरस्य।"[२३] तथा च "तस्मादपि रथरूपितं शरीरं परम्। तदायत्तत्वाज्जीवस्य सकलपुरुषार्थसाधनप्रवृत्तीनाम्।"[२४] भूयश्चेन्द्रियादयः रूपकयोजनायां स्वशब्दैरेव प्रत्यभिज्ञायते, परिशिष्टं शरीरमव्यक्तशब्देनोच्यत इत्यपि समादधत्।[२५]

पुनश्चाऽव्यक्तशब्दः व्यक्तत्वाऽभाववद्वस्त्वेव ब्रवीतीति विज्ञाय स्थूलशरीरकारणभूत-भूतसूक्ष्मग्रहणं विहितम्।

---

[२२] ब्रह्मसूत्रस्वामिनारायणभाष्यम् – १/४/१

[२३] ब्रह्मसूत्रशाङ्करभाष्यम् – १/४/१/३

[२४] श्रीभाष्यम् – १/४/१

[२५] श्रीभाष्यम् – १/४/१

एतत्सर्वं गौरवार्थपरिवर्तनदोषादिकं सम्परित्यज्यस्वामिनारायणभाष्ये तु तत्त्वतः प्रत्यङ्ङात्मतः परभूतमक्षरब्रह्माख्यं तत्त्वमेव गृहीतं येन न कस्यापि विशिष्टसमाधानस्यावश्यकता न चार्थपरिवर्तनदोषाऽऽपादनसम्भावना। कठोपनिषदि रूपकयोजनस्यापि सेतुपदेनारब्धत्वात् सेतुरूपकस्याक्षरब्रह्मार्थकत्वेन च ग्रहणाच्छरीररूपकविन्यासेऽत्र भवत्यक्षरब्रह्म सुसङ्गतम्।

महतः परं ध्रुवं निचाय्येति मन्त्रांशस्यापि महतः प्रत्यङ्ङात्मतः परभूतमव्यक्तं यदक्षरब्रह्मतत्त्वं पुरुषपदवाच्यपरब्रह्मतत्त्वं च निचाय्य ध्यात्वा ज्ञात्वा वेत्यर्थः सम्यक्तया सङ्गतिमेति। अन्यत्र तु शरीराद्यर्थकत्वात् तद्ध्याननिषेधावश्यकताऽऽपतिता। अव्यक्तोऽक्षर इत्युक्त इतिगीतासङ्गतिरप्यक्षरार्थसम्पोषिका।

## उपसंहारः

उपरोक्तदर्शनत्रयविहिताऽव्यक्तशब्दार्थमवलोक्य मन्मत्यानुसारं ज्ञायते यदक्षरपुरुषोत्तमदर्शने निरूपिताऽव्यक्तशब्दयोजना वर्तते सुस्पष्टा सुसङ्गता सुयोग्या च।

यद्यपि मदल्पमत्यैवास्मिन् विषये उक्तवानहम्। भगवत्पादाः पूर्वाचार्यास्तु खलु पूजनीया महान्तः स्वस्वसम्प्रदायसिद्धान्तानुसारं श्रुतिमातृवचांसि ब्रह्मसूत्राणि च सार्थकीकर्तुं विहितातिशयितोद्यमाः। अतस्तैः प्रतिपादितानर्थान् नमस्कृत्य तेषां चरणेषु च भूयांसि वन्दनानीति शम्।

## सन्दर्भग्रन्थाः


1. श्रीमच्छङ्कराचार्यकृत उपनिषद्भाष्य खण्ड १, प्रकाशकः – गीताप्रेस गोरखपुर, सं. 2010
2. शङ्कराचार्यः ब्रह्मसूत्रशाङ्करभाष्यम्, संपादकः - अनन्तकृष्णशास्त्री, प्रकाशकः - पाण्डुरङ्ग जवाजी, निर्णयसागरप्रेस, मुम्बई, १९८२
3. नारायण, रंगरामानुज, Kūranārāyaṇa, and India) Ānandāśrama (Pune. ईशकेनकठप्रश्नमुण्डमाण्डूक्यानंदवल्लीभृगूपनिषदः: तासु रामानुजमतानुयायिनारायणकृतप्रकाशिकासमेतेशोपनिषत् ; रंगरामानुजविरचितप्रकाशिकासमेताः केनादिमुण्डकान्ताः ; रामानुजमतानुयायिकुरनारायणरचितप्रकाशिकोपेता माण्डूक्योपनिषत् ; रंगरामानुजविरचितप्रकाशिकोपेते आनंदवल्लीभृगूपनिषदौ, 1947.
4. रामानुजाचार्यः. श्रीभाष्यम्, संस्कृतसंशोधनग्रन्थमाला - २२, संस्कृतसंशोधनसंसत्, मेलुकोटे, १९९५

5. साधुभद्रेशदासः. स्वामिनारायणसिद्धान्तसुधा - परब्रह्मस्वामिनारायणप्रबोधितम् अक्षरपुरुषोत्तमदर्शनम्, प्रकाशकः - स्वामिनारायण अक्षरपीठ शाहीबाग, अमदावाद, २०१७

6. महामहोपाध्यायः साधुभद्रेशदासः ईशाद्यष्टोपनिषत्स्वामिनारायणभाष्यम्, परब्रह्मस्वामिनारायणप्रबोधित-अक्षरपुरुषोत्तमदर्शनप्रतिपादकं शास्त्रम्. 2nd ed. Amadāvāda: Svāminārāyaṇa Akṣarapīṭha, 2019.

7. महामहोपाध्यायः साधुभद्रेशदासः. ब्रह्मसूत्रस्वामिनारायणभाष्यम्, परब्रह्मस्वामिनारायणप्रबोधित-अक्षरपुरुषोत्तमदर्शनप्रतिपादकं शास्त्रम्. 2nd ed. Amadāvāda: Svāminārāyaṇa Akṣarapīṭha, 2019.